ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. VIII  Oct, 2015 - Mar, 2016  No. 2

वर्षम् - ८ अक्टूबर, २०१५ - मार्च, २०१६ अङ्कः - द्वितीयः

# प्राचीसुधा

## PRACI SUDHA

'प्राचीसुधा' सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ॥

सम्पादकः सञ्चालकश्च

डॉ॰ विश्वनाथस्वाईँ

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

PURI, ODISHA

Scanned by CamScanner

# ऋग्वेदसंहितायां मित्रावरुणौ

डॉ. शत्रुघ्नपाणिग्राही

राष्ट्रसञ्चालने यथा परमेश्वरांशभूतानां विविधनामाधारिणां जनानामुपस्थितिः लक्ष्यते तथैव ब्रह्माण्डसञ्चालनार्थं परमेश्वरः सर्वेश्वरः कर्मानुसारं स्वकीयस्वरूपस्य विविधरूपाणि विभिन्ननामाभिः सम्बोध्यते । परमेश्वरस्य एतानि विविधरूपाणि शक्तयः "देवता" इति शब्देन ज्ञायन्ते[१] । महाभाग्याद्देवताया एक एव आत्मा बहुधा स्तूयते[२] इति यास्कवचनेन स्पष्टं भवति यत् महैश्वर्ययोगात् देवतासु सर्वं सम्भवति । सम्यग्रूपेण पृथिव्याः परिचालनार्थं प्रत्येकं लोके देवाः भवन्ति । तेषु द्युस्थानीयदेवेषु वरुणस्य मित्रस्य च स्थानं वर्तते । अत्र वरुणस्य मित्रेण साकं घनिष्ठताकारणात् द्वयोः एकरूपत्वम् ऋषिभिः दर्शितम् । तत् मित्रावरुणसूक्तम् इति नाम्ना ज्ञायते ।

मित्रावरुणौ ऋग्वेदसंहितायां सामान्यरूपे देवते इति प्रतिपादितं यतो हि देवः सः भवति यः अपरेभ्यः किमपि प्रयच्छति । मित्रावरुणयोः युगलस्वरूपं मित्रावरुणौ इति कथ्यते । द्वयोः देवयोः द्वन्द्वसमासे "देवता द्वन्द्वे च"[३] इति पाणिनीयसूत्रानुसारं पूर्वपदे आनङ्(आ) अन्तादेशो भवति; येन मित्र इति स्थले मित्रा इति भवति । वरुणेन साकं मित्रस्य घनिष्ठता दृश्यते । आचार्य-यास्केन निरुक्ते प्रोक्तम् – "अथापि मित्रावरुणेन संस्तूयते । आ नो मित्रावरुणा...."[४] इति ।

**मित्रावरुणयोः स्वरूपम् –**

वरुण इति शब्दः वृ उनन् प्रत्ययेन निष्पद्यते[५] । हलायुधकोशे "कुवृदारिभ्य उनन्", "वृणोति सर्वं, व्रियते अन्यैरिति वा" इति व्यत्पत्तिर्जाता[६] । आचार्य-यास्कः वरुणशब्दः वृञ्-धातुतः निष्पन्न इति कथयति यस्यार्थः भवति सर्वान् आच्छादयति[७] । वरुणस्य स्वरूपवर्णनावसरे दृश्यते यत् सः बाहुं भ्रामयति, रथं वाहयति, भोजनादिकमपि करोति । तस्य शरीरं बलिष्ठं पुष्टं सुन्दरं दर्शनीयञ्च वर्तते । शतपथब्राह्मणे श्रूयते यथा – साक्षादेव वरुणमवयजते शुक्लस्य खलतेः विक्लियस्य, पिङ्गलाक्षस्य मूर्धनि जुहोति[८] । सूर्यः तस्य नेत्रत्वात् दूरस्थपदार्थानां दृष्टिगोचरं करोति । स्वसहस्रनेत्रैः भुवनेषु उत्पद्यमानानां सर्वेषां कार्याणां निरीक्षणं करोति तथा मनुष्याणां हृदयेषु जायमानानां भावनानां ज्ञानमपि करोति[९] । सत्यौजाः इति शब्दः तस्य कृते प्रयुक्तो भवति[१०] । अन्तरिक्षस्थानां देवतानां मध्ये वरुणः प्रधानतमः । तस्मिन् पुरुषविधत्वारोपोऽतिमात्रं प्रवृत्तः । तस्मात् तदीयं मूलस्वरूपं सम्यगनभिज्ञायमानं केवलं तदीयस्वभावविशेषमात्राद्नुमेयं वर्तते । "वरुणस्"

इत्ययं शब्द: प्रथमं व्यापनशीले गगनरूपेऽर्थे प्रयुक्तत्वेनोपलभ्यमान: वर्णविकारनियमानां दुर्घटत्वेऽपि "औरणस्" इत्यनेन ग्रीक्शब्देन सगर्भ्यो विभाति । सोऽयं वरुण: यद्यपि इन्द्रादग्ने: सोमाच्चाल्पतरसंख्यै: सूक्तै: स्तूयमानस्तदपेक्षयाऽधरीभूतस्तथापि महिम्ना वेदोक्तेभ्य: सर्वेभ्योऽपि देवेभ्य: उत्कृष्टतमं स्थानमधिरूढो बाढमिन्द्रेण सह समानं स्थानं भजते । तत्रेन्द्रोऽप्रतिद्वन्द्वी वीर:[11] । वरुणस्तु व्यावहारिकस्य च ऋतस्य धारयितेत्येतावानस्ति तयोर्भेद: । तत्र वरुणस्तुतिपरा मन्त्रा: सादरं नीतिधर्ममुपदिशन्ति । सोऽयमृग्वेदभाग: सर्वथापि हीब्रूस्तुतिरिव महतीं श्लाघामर्हति । वायुरेव मित्र इति श्रूयते शतपथब्राह्मणे[12] । आचार्ययास्क: मित्रस्य निर्वचनं कृत्वा कथयति – मित्र प्रमीतेस्त्रायते, संमिन्वानो द्रवतीति वा, मदयतेर्वा[13] । इति ।

**मित्रावरुणयो: कर्म –**

"तन्मित्रस्य वरुणस्याभिचक्षसे सूर्यो रूपं कृणुते द्योरुपस्थे"[14] इति ऋग्वेदीयमन्त्रानुशीलनेन ज्ञायते सूर्यमाध्यमेन मित्रावरुणौ सर्वेषां गतिविधिं ज्ञात्वा तिष्ठत: । वरुणस्य शासनाधीने नक्षत्राणि चन्द्रश्च गमनागमनं कुर्वन्ति[15] । तस्य नियम: सर्वदा अविचलित: दृढश्च । एतदर्थं सर्वे देवा: मानवाश्च तस्य व्रतपालने यत्नशीला: भवन्ति । अत: जीवपुरुष: प्रार्थ्यते – "यच्चिद्धि ते विशो प्र देव वरुण व्रतम्[16] इति । वरुणस्य प्रभाव: स्वभावश्च ऋषिणेत्थं स्तूयते – वरुणस्याज्ञया द्यावापृथिव्यो: पृथगात्मतया व्यवस्थानम् । स एव लोकस्य प्रकाशाय सूर्याभिधानां सौवर्णदोलां दिवि निरमात् । स एव च सूर्यस्य सञ्चाराय विशालं पन्थानमकल्पयत्[17] । अन्तरिक्षे प्रतिध्वनन् वायु: तस्य निश्वसितम् । सत्यैवाज्ञया चारुतरं प्रकाशमानश्चन्द्रो रात्रौ सञ्चरति तथा ताराश्च तावद्दूरे स्थिता: रात्रौ स्फुरन्ति दिवा निलीयन्ते च । तस्यैव प्रभावान्नद्योऽप्यविरतं स्पन्दन्ते तथा स्पन्दमाना अपि न जातु समुद्रं जलेन पूरयन्ति । स एव विलक्षणरूपेण भाजनेन जलमापूर्य पर्वतेषु मेघावृत्तेषु तेन जलेन भुवनमार्द्रीकरोति । इत्थं वरुणोऽयं जलानामधिपतित्वेन वर्ण्यते । तस्य समुद्रेण सम्बन्धस्तु क्वचित् एव दृश्यते ऋग्वेदे[18] । तेन समुद्रस्य स्थापना कृतेति श्रूयते च ऋग्वेदे[19] ।

सर्वज्ञत्वं च वरुणस्य तत्र तत्राभिव्यज्यते । तथा हि – स नभसि पक्षिणाम् उड्डनं, समुद्रे नावां चलनं, दूरगतेर्वायो: पन्थानं च जानाति[20] । सर्वमुत्पन्नमुत्पत्स्यमानं वा रहस्यं वेत्ति । स जनानां सत्यासत्ये अवगच्छति । तेन विना जन्तवो निमिमात्रं जीवितुमपि न पारयन्ति । एवं कल्याणधर्मा भुवनस्य गोप्ता वरुण: सर्वोत्कृष्टमहिमाधारित्वेन वर्णित: । तदाज्ञाविरुद्धेन पापकर्मणा प्रवृत्तान् जनान् बध्नाति स पाशोऽपि ऋग्वेदे स्तूयते[21] ।

Scanned by CamScanner

यद्यप्ययमसत्यस्य हन्ता द्वेष्टा दण्डयिता च श्रूयते तथाप्यनुतापभाजामनुग्राहको भवति । न केवलमयं जनान् स्वकृतेभ्यः एव किन्तु पितृकृतेभ्योऽपि पापेभ्यो मोचयति । धर्ममुल्लङ्घमानोऽपि यः तस्य शरणं प्रपद्यते तमसौ मोचयति । अपि च येऽज्ञानात् तदाज्ञामतिक्रामन्ति तानप्यनुगृह्णाति । वस्तुतो यथा ऋग्वेदेऽन्यदेवताकेषु सूक्तेषु लोकक्षेमाभ्यर्थनादयो विषया वर्ण्यन्ते न तथा वरुणसूक्तेषु । एतदीयानि हि सर्वाणि सूक्तानि क्षमाभ्यर्थनमात्रपराण्येव ।। पश्चाद्विश्वसृजः प्रजापतेर्लोकेशत्वकेशत्वकल्पनाव्यतिकरे, मन्यामहे, वरुणस्य, महिमानः क्रमेण परिम्लाना अभूवन् । क्रमशस्तस्य जलाधीशत्वमात्रवशेषितम् । अत एव पश्चादथर्ववेदे तदनन्तरं पुराणादौ च तस्य जलाधीशताविषये ज्ञायते ।

ऋग्वेदे कर्मभेदाद्भिन्नाः पञ्च सौरदेवाः सन्ति । तेषु एकः प्राचीनतमो मित्रः यो हि हितकारितारूपकर्मप्रवृत्तत्वे श्रूयते, यथा –

> मित्रो जनान्यातयति ब्रुवाणो मित्रो दधार पृथिवीमुद्याम् ।
> मित्र कुष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवज्जुहोत[२२] ।। इति ।

देवतानां मध्ये काश्चिदतियवीयसः पूर्वकालादागताः प्रत्यभिज्ञायन्ते । तथा ह्यवस्तीयदेवताभिः सह सादृश्ये निरूप्यमाणे – तत्र काश्चिद्देवताः पारसीकानां भारतीयानां च मिथो विश्लेषात् पूर्वमाविर्भूताः प्रत्यवसीयन्ते । तथा हि – वेदोक्तः परेतराड्यमः पारसीकानां मध्ये स्वर्गाधिपतित्वेन प्रसिद्धः इम एव । अत्र विषये मित्रो मूर्धाभिषिक्तमुदाहरणम् । यः खलु पारसीकैः "मिथ्र" इत्युच्यमानः क्रिस्तोः परं द्वितीयशतकादारभ्य चतुर्थशतकपर्यन्तं रोमकदेशे समान्ताल्लब्धप्रचारस्तत्रत्यैरधःकृतदेवतान्तरैर्लौकैकनायकत्वेन आराधितः । अयं मित्रदेवः यजमानैः स्तूयमानः सन् स्वोपदेशैः सर्वान् लोकान् नियन्त्रयन् स्वस्वकर्मणि नियोजयति । मित्रावरुणौ स्वीयया विभूत्या भूमिं द्याञ्चावधारयन्तौ पृथिव्यां कृषिकर्मरतान्, यज्ञकर्मनिरतांश्च सर्वान् जनान् साभिप्रायं सर्वदैव पश्यन्तौ वर्तेत इति श्रूयते ऋग्वेदे[२३] । इण्डोऐरेणिकालादवतीर्णोऽयं क्रमेण ऋग्वेदे आत्मानो रूपमपहाय वरुणभेदं प्रपन्नः ।

**मित्रावरुणयोर्मध्ये अभेदकल्पना –**

> इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
> एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।।[२४]

इति ऋग्वेदीयवचनानुसारं ज्ञायते देव एक एवाऽस्ति । तस्य बुहत्वस्य कल्पना-गुणानामाधारेणैव भवति । तेषु ऋग्वेदे हि काश्चिद्देवता द्वन्द्वरूपेण स्तूयन्ते । तत्र

चैकदेवतानिष्ठा विशेषधर्माः द्वन्द्वीकृतायामितरस्यां संक्रामन्तस्तस्याः पृथक् स्तुतावपि तद्गतत्वेन स्तूयन्ते । तथा ह्यसकृदिन्द्रेण सह द्वन्द्वीकृत्य स्तुतौ वृत्रहन्तृत्वादिरूपैरिन्द्रधर्मैः संयुक्तोऽग्निः यदा तु पृथगेव स्तूयते तदापि तद्धर्मैः संयोज्यते । इत्थंरीत्या सर्वेषां देवानां सर्वविधशक्तिमत्त्ववर्णनात् तेषामभेदकल्पनाऽपि सुलभसाध्याऽभूत् । दृश्यते चायमभेदवादो बहुत्र ऋग्वेदे । तथा हि ऋषिः अग्निं सम्बोधयन्नाह[२५] –

"त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः ।

त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दशुषे मर्त्याय" ।। इति ।

श्रूयते अथर्ववेदे – "स वरुणः सोयमग्निर्भवति स मित्रो भवति प्रातरुद्यन् ।।[२६] इति ।

द्वन्द्वसमासविधिना देवानां द्वन्द्वीकृतवर्णनं वर्तते । एवं विधानि द्वादशद्वन्द्वानि समग्रैः सूक्तैः स्तूयन्ते षट्चान्यानि विप्रकीर्णैर्मन्त्रैः । एवंभूतेषु सूक्तेषु अधिकसंख्याकानि सूक्तानि मित्रावरुणावुद्दिश्य प्रवर्त्तितानि सन्ति । अनेन प्रकारेण ऋग्वेदे मित्रस्य वरुणेन सह द्वन्द्वीकृतस्तुतिः श्रूयते ।

आचार्य-दयानन्दः स्वकीयभाष्ये "मित्रावरुणौ" इत्यत्र प्राण-उदानौ, विद्युत्-पवनौ, सूर्य-वायू, जीवात्म-मनसी, ब्राह्मण-क्षत्रियौ इति अर्थं करोति । काठकसंहितायां मित्रावरुणविषये श्रूयते यथा – चक्षुश्च मनश्च मैत्रावरुणा ।[२७] इति ।

ब्राह्मणादिग्रन्थेषु मित्रस्य सम्बन्धः अह्ना साकं, वरुणस्य सम्बन्धः रात्र्या साकं वर्तते । मित्रः सुहृत् सहायकः सूर्यस्य रक्षणशक्तेः प्रतिनिधिरूपः । मित्रावरुणौ द्वौ एकस्मिन् रथे आरोहणं कृत्वा चलतः इति ऋग्वेदे बहुवारं श्रूयते[२८] । एतौ द्युस्थानीयौ देवौ स्त ।अस्य विश्वस्य नैतिकदेवतारूपेण द्वौ परिचितौ भवतः । विश्वं विष्णुकर्म । तत्रापि मध्यवर्तिशक्तिभूतानां देवतानां सुसम्पर्कात् विश्वस्थितिः सुदृढा भवति । याः खलु देवताः एतस्मिन् प्रसङ्गे सम्पृक्ताः तेषु मित्रावरुणौ प्रसिद्धौ स्तः । अतः जीवपुरुषः तौ स्तौतीति ।

---

**सन्दर्भाः –**

१. देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थाने भवतीति वा । निरुक्तम्-७.१५
२. तत्रैव – ७.४ ।
३. पाणिनीय-अष्टाध्यायी – ६.३.२६ ।
४. निरुक्तम् – ७.३ ।
५. संस्कृत-हिन्दी कोष – पृ.९००, वामन शिवराम आप्टे ।
६. हलायुधकेशः, पृ.-५९० ।

Scanned by CamScanner

७. वृणोतीति सतः । निरुक्तम् – ७.४ ।

८. शतपथब्राह्मणम् – १३.३.६.५ ।

९. अतो विश्वान्यद्भुता चिकित्वां अभि पश्यति ।
कृतानि या च कर्त्वा ।। ऋग्वेदः – १.२५.११ ।

१०. वरुणोसि सत्यौजा । यजुर्वेदः – १०.२८ ।

११. इन्द्रश्च सम्राड् वरुणश्च राजा । यजुर्वेदः – ८.३७ ।

१२. अयं वै वायुर्मित्रो योऽयं पवते । शतपथब्राह्मणम् – ६.५.७.१४ ।

१३. निरुक्तम् – १०.२१ ।

१४. ऋग्वेदः – १.११५.५ ।

१५. ऋग्वेदः – १.२४.१० ।

१६. ऋग्वेदः – २.२५.१ ।

१७. ऋग्वेदः – १.२४.७ ।

१८. ऋग्वेदः – ७.६४.२, ७.४९.१, २.३.४ ।

१९. अव सिन्धुं वरुणो द्यौरिव स्थाद् । ऋग्वेदः – ७.८७.६ ।

२०. वेदा यो वीनां परदमन्तरिक्षेण पतताम् ।
वेद नावः समुद्रियः । ऋग्वेदः – १.२५.७ ।

२१. ऋग्वेदः – १.२४.२५, अथर्ववेदः – ४.१६.६ ।

२२. ऋग्वेदः – ३.५९.१ ।

२३. प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ आ यत् क्रत्वा न शरदः पृणैथे ।।
ऋग्वेदः – ७.६१.२ ।

२४. ऋग्वेदः – १.१६४ ।

२५. ऋग्वेदः – ५.३.१ ।

२६. अथर्ववेदः – १३.३.१३ ।

२७. काठकसंहिता – २७.५ ।

२८. तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि । ऋग्वेदः – ५.६३.१ ।

—०—

वेदवेदाङ्गसङ्कायाध्यक्षः,
श्रीसोमनाथसंस्कृतयूनिवर्सिटी, वेरावलस्, गुजरात्

Scanned by CamScanner